# Mahalakshmi Ashtakam

Sanskrit · Devanagari source script · Latin rendering available

॥ अथ श्री महालक्ष्म्यष्टकम् ॥
श्रीगणेशाय नमः ॥ इंद्र उवाच ॥
नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते । शंखचक्र गदाहस्ते महालक्ष्मि नमोऽस्तुते ॥१॥

|| atha śrī mahālakṣmyaṣṭakam ||
śrīgaṇeśāya nama: || iṃdra uvāca ||
namaste'stu mahāmāye śrīpīṭhe surapūjite | śaṃkhacakra gadāhaste mahālakṣmi namo'stute ||1||

नमस्ते गरुडारुढे कोलासुर भयंकरी । सर्वपापहरे देवी महालक्ष्मि नमोऽस्तुते ॥२॥

namaste garuḍāruḍhe kolāsura bhayaṃkarī | sarvapāpahare devī mahālakṣmi namo'stute ||2||

सर्वज्ञे सर्ववरदे सर्वसुष्टभयंकरी । सर्वदुःखहरे देवी महालक्ष्मि नमोऽस्तुते ॥३॥

sarvajñe sarvavarade sarvasuṣṭabhayaṃkarī | sarvadu:khahare devī mahālakṣmi namo'stute ||3||

सिद्धिबुद्धिप्रदे देवी भुक्तिमुक्तिप्रदायिनि । मंत्रमूर्ते सदा देवी महालक्ष्मि नमोऽस्तुते ॥४॥

siddhibuddhiprade devī bhuktimuktipradāyini | maṃtramūrte sadā devī mahālakṣmi namo'stute ||4||

आद्यंतरहिते देवी आद्यशक्ति महेश्वरि । योगजे योगसंभूते महालक्ष्मि नमोऽस्तुते ॥५॥

ādyaṃtarahite devī ādyaśakti maheśvari | yogaje yogasaṃbhūte mahālakṣmi namo'stute ||5||

शूल सूक्ष्ममहारौद्रे महाशक्ति महोदरे । महापापहरे देवी महालक्ष्मि नमोऽस्तुते ॥६॥

śūla sūkṣmamahāraudre mahāśakti mahodare | mahāpāpahare devī mahālakṣmi namo'stute ||6||

पद्मासनस्थिते देवी परब्रह्मस्वरुपिणि । परमेशि जगन्मातार्महालक्ष्मि नमोऽस्तुते ॥७॥

padmāsanasthite devī parabrahmasvarupiṇi | parameśi jaganmātārmahālakṣmi namo'stute ||7||

श्वेतांबरधरे देवी नानालंकार भूषिते । जगत्स्थिते जगन्मातार्महालक्ष्मि नमोऽस्तुते ॥८॥

śvetāṃbaradhare devī nānālaṃkāra bhūṣite | jagatsthite jaganmātārmahālakṣmi namo'stute ||8||

महालक्ष्म्यष्टकं स्तोत्रं य: पठेद्भक्तिमान्नर: । सर्वसिद्धिमवाप्नोति राज्य प्राप्तेति सर्वदा ॥९॥

mahālakṣmyaṣṭakaṃ stotraṃ ya: paṭhedbhaktimānnara: |
sarvasiddhimavāpnoti rājya prāpteti sarvadā ||9||

एककाले पठेन्नित्यं महापापविनाशनम् । द्विकालं य: पठेन्नित्यं धनधान्यसमन्वित: ॥१०॥

ekakāle paṭhennityaṃ mahāpāpavināśanam | dvikālaṃ ya:
paṭhennityaṃ dhanadhānyasamanvita: ||10||

त्रिकालं य: पठेन्नित्यं महाशत्रुंविनाशनम् । महालक्ष्मिर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

trikālaṃ ya: paṭhennityaṃ mahāśatruṃvināśanam |
mahālakṣmirbhavennityaṃ prasannā varadā śubhā ||11||

इतिंद्रकृत: श्रीमहालक्ष्म्यष्टकस्तव: संपूर्ण: ॥

itiṃdrakṛta: śrīmahālakṣmyaṣṭakastava: saṃpūrṇa: ||

---

## Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. श्रीमहालक्ष्म्यष्टकम्, revision 54882. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-54882-5576702689.